विष्णुपुराणम् ।
"स्नानार्द्रां धरणीञ्चैव दूरतः परिवर्जयेत् ।"
इत्याह्निकतत्त्वम् ॥*॥
तान्त्रिकस्नानविधिर्यथा । तत्र नद्यादौ वैदिकस्नानं कृत्वा तान्त्रिकस्नानमाचरेत् । तथा च गौतमीये ।
"अथ स्नानं तथा कुर्य्यात् यथाशास्त्र-
विधानवित् ।
मलप्रक्षालनं स्नानं स्वशाखोक्तं समाचरन् ।
मन्त्रस्नानं ततः कुर्य्यात् कर्म्मणां सिद्धिहेतवे ॥"
तद्यथा । अद्येत्यादि अमुकदेवताप्रीतये मन्त्रस्नानमहं करिष्ये इति सङ्कल्पं कुर्य्यात् । तथा च कुलचूड़ामणौ ।
"ताम्रपात्रं सदूर्व्वञ्च सतिलं सजलं ततः ।
गृहीत्वामुकदेवस्य प्रीतये स्नानमाचरेत् ॥"
ततः षड़ङ्गन्यासप्राणायामौ कृत्वा गङ्गे च इत्यनेनाङ्कुशमुद्रया,सूर्य्यमण्डलात्तीर्थमावाह्य वमिति धेनुमुद्रयामृतीकृत्य कवचेनावगुण्ठ्यास्त्रेण संरक्ष्य मूलेन एकादशधाभिमन्त्र्य सूर्य्याभिमुखं द्वादशधारा विनिःक्षिप्य तस्मिन्निष्टदेवताचरणारविन्दनिःसृतजले निमज्य देवतां ध्यायन् मूलमन्त्रं यथाशक्ति जपन् उन्मज्य उदकेन त्रिवारजप्तेन कलसमुद्रया त्रिवारमात्मानमभिषिच्य वैदिकसन्ध्यादिकं कृत्वा सूर्य्यार्घ्यं दत्त्वा तान्त्रिकाघमर्षणादिवारिधारान्तं कर्म्म कुर्य्यात् । इति तन्त्रसारः ॥*॥ अन्यच्च ।
"जन्मान्तरसहस्रेण यत् पापं कुरुते नरः ।
मुच्यते सर्व्वपापेभ्यः स्नात्वा क्षारार्णवे सकृत् ॥
याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति
स्नानं मध्यं दिने कुर्य्यात् जीर्णेऽन्ने तु निरामयः
नद्यामस्तमिते स्नानं न कुर्व्वीत सदा बुधः ।
नद्यां स्नात्वा नदीं चान्यां न प्रशंसेत पण्डितः ॥
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ।
स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत् ॥
नदीदेवनिखातेषु तड़ागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥
निपातनादुद्धृतं पुण्यं ततः प्रस्रवणादिकम् ।
ततोऽपि सारसं पुण्यं ततो नादेयमुच्यते ।
तीर्थतोयं ततः पुण्यं गङ्गातोयं ततोऽधिकम् ॥"
इति वह्निपुराणे आह्निकतपोनामाध्यायः ॥
किञ्च ।
नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्
क्रियास्नानं तथा षष्ठं षोढ़ास्नानं प्रकीर्त्तितम् ॥
अस्नातस्तु पुमान्नार्हो जप्यादिष्वग्निनादिषु ।
प्रातःस्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम् ॥
चाण्डालशवविष्ठादेः स्पृष्ट्वा स्नानं रजस्वलाम् ।
स्नानार्हश्च यदा स्नाति स्नानं नैमित्तिकं हि
तत् ॥
पुष्यस्नानादिकं स्नानं दैवज्ञविधिचोदितम् ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत् प्रयोजयेत्
जप्तुकामः पवित्राणि अर्च्चिष्यन् देवतातिथीन् ।
स्नानं समाचरेद्यस्तु क्रियाङ्गं तत् प्रकीर्त्तितम्
मलापकर्षणं नाम्ना स्नानमभ्यङ्गपूर्व्वकम् ।
मलापकर्षणार्थाय प्रवृत्तिस्तत्र नान्यथा ॥
सर्व्वेषु देवखातेषु तीर्थेषु च नदीषु च ।
स्नानमेव क्रिया यस्मात् क्रियास्नानमतः स्मृतम्
इति गारुड़े १०५ अध्यायः ॥*॥
कुशहस्तस्य वैष्णवविशेषस्य स्नानादिनिषेधो मानसस्नानप्रशंसा च यथा,—
"सर्व्वकर्म्मफलत्यागी हरेः संकल्पवर्ज्जितः ।
नो द्विजः कुशहस्तः स्यात् स्नानपूजाजपादिषु ॥
कदाचिद्दर्भस्तो न त्यक्तकामस्तु वैष्णवः ।
स्नानादिषु च कृत्येषु गोविन्दस्यार्च्चनादिषु ॥
मृदासनः कुशकरो वैष्णवो न भवेद्द्विज ।
हरेः कुर्य्यात् प्रयत्नेन सर्व्वसेवाजपादिषु ॥
अस्नातो न जपेन्मन्त्रं गोविन्दस्य महात्मनः ।
कदाचिदशुचिर्भूत्वाप्यस्नातोऽपि च मानवः ॥
मानसस्नातको लोको मुकुन्दस्यार्च्चनादिषु ।
पूतात्मा यदि मन्त्रस्य शुद्धो भवति जापकः ॥
भवेत्तु मानसस्नायी यो बाह्याभ्यन्तरः शुचिः ।
जपाधिकारी स भवेत् कृष्णमन्त्रस्य मानवः ॥
ऐन्द्रस्नानाद्वरं काम्यं काम्यादाग्नेयमेव च ।
आग्नेयादाशुचं श्रेष्ठं वारुणञ्चाशुचादपि ॥
अवगाहं वारुणात्तु वैदिकञ्चावगाहनात् ।
वैदिकादपि नैमित्तं तस्माद्वै मार्ज्जनं वरम् ॥
मार्ज्जनान्मान्त्रिकं श्रेष्ठं भौमं-स्यान्मान्त्रिका-
धिकम् ।
भौमस्नानाद्वरं ब्राह्मं ब्राह्मतः पौष्णमेव च ॥
पौष्णतो नैर्म्मलं स्नानं वायव्यञ्च ततोऽधिकम् ।
वायव्यान्मानसञ्चेह सर्व्वस्नानात् परं वरम् ॥
मर्त्तश्चेत् मानसस्नातः सर्व्वत्र विजयी भवेत् ।
गोविन्दसर्व्वसेवासु चार्हतामेति धारणा ॥
स जापको वैष्णवः स्यात् हरेर्भजनतत्त्ववित् ।
मानसस्नानवान् यो वा भक्तश्चात्र सदा सुखी ॥"
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥ * ॥
अन्यच्च ।
"मानसं वैदिकं चैव मान्त्रिकं मार्ज्जनं तथा ।
अवगाहनञ्च नैमित्तमाशुचं पुण्यमेव च ॥
नैर्म्मलं वारुणं ब्राह्मं मैत्रं काम्यञ्च नारद ।
वायव्यं भौममाग्नेयं षोड़शस्नानमीरितम् ॥
गोविन्दमन्त्रग्रहणं दीक्षया तु गुरोर्नृणाम् ।
यदाभिषिक्तं चित्तं स्यात्तत्स्नानं मानसं शुभम्
मर्त्त्यस्य नामग्रहणं यदा कार्ष्णाध्वरे गुरोः ।
स्नानदेहेन्द्रियमनस्तत् स्नानं मानसं भवेत् ॥
नामसंकीर्त्तनं विष्णोर्नरः कुर्य्यादकैतवात् ।
सदैव चेन्महास्नानं शरीरसुखकारणम् ॥
कया कस्त्वा स्वस्ति नश्चेत् यदि वेदैश्च वैदिकम्
दर्भशान्त्युदकैः स्नानं यत्नान्ते अभिषेचनम् ॥
सहस्रशीर्षा तद्विष्णोरिति मन्त्रादिभिर्द्विज ।
चेत् पयोऽभ्युक्षणं स्नानं मान्त्रिकं समुदाहृतम्
ॐ शन्न आपोहिष्ठेति ऋतञ्चेत्यादिभिर्यदि ।
पाठे कुर्य्यात् कुशस्नानं मार्ज्जनं द्विज ईरितम्
जलेषु मज्जतां नृणां मज्जनन्तु यदा शिरः ।
तदा सर्व्वपुषः स्यादवगाहनमुच्यते ।
गोविन्दद्वादशीमाघीवारुण्यर्द्धोदयादिषु ।
स्नानं यत्तच्च नैमित्तं ग्रहणे चन्द्रसूर्य्ययोः ॥
मैथुने वमने रेतःस्खलने मृतके तथा ।
विण्मूत्रादिशवस्पर्शे शवानुगमनेऽपि च ॥
निद्रान्ते जातकेनृणामस्पृश्यस्पर्शनादिषु ।
रजस्वलाचतुर्थाहे यत् स्नानं स्यात्तदाशुचम् ॥
गङ्गादिसर्व्वतीर्थेषु विष्णुपादोदकैस्तथा ।
यत् स्नानमभिषेकञ्च पुण्यं तत् परिकीर्त्तितम्
हेलया श्रद्धया नृणां भक्त्या यत्नेन नारद ।
गङ्गाम्भोयष्टिवत्स्नानं महापापादिनाशनम् ॥
गङ्गास्नानं मनुष्याणां सर्व्वकल्मषनाशनम् ।
स्तम्बवच्चापि काष्ठस्य भवेन्मूषलवत् यदि ॥
स्नानं स्यात् सर्व्वतीर्थेषु नानायज्ञफलप्रदम् ।
शालग्रामशिलावारि योऽभिषेकं समाचरेत् ॥
अकालमृत्युहरणं सर्व्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयेद्यदि
यदि सर्व्वमनुष्याणां बाह्यान्तर्मलशोधनम् ।
तदेव नैर्म्मलस्नानं शरीराणां भवेत् ध्रुवम् ॥
स्वेदास्रुमज्जाविण्मूत्रचिकुराः क्षतजा वसा ।
दूषिका कर्णविट् श्लेष्मा नृणां बाह्यमलाः स्मृताः
मलैस्तु मलिनो देहो नवच्छिद्रैश्च छिद्रितः ।
स्रवत्यविरतं पूर्णो दिवारात्रौ मलान्ततः ॥
अद्भिश्च गोमयैश्चापि मलानामपमार्ज्जनम् ।
सर्व्वत्र क्षालनं कृत्वा सर्व्वाङ्गप्रयतो मुनिः ॥
अष्टाङ्गयोगाभ्यासैश्च देहप्रक्षालनं ततः ।
नरोऽम्बुमज्जनं कुर्व्वन् स्नानं भवति नैर्म्मलम् ॥"
इति पाद्मे उत्तरखण्डे ११३ अध्यायः ॥ * ॥
किञ्च ।
"तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥
अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम् ।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्
करेण मार्ज्जयेद्गात्रं स्नानवस्त्रेण वा यदि ।
शुनास्पृष्टं भवेद्गात्रं पुनः स्नानेन शुध्यति ॥
अप्रक्षाल्य तु पादौ यः स्नात्वा गच्छति मन्दिरम्
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति ॥
स्नानं रजकतीर्थेषु भोजनं गणिकालये ।
शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने ॥"
इति कर्म्मलोचनः ॥
अन्यत् मत्स्यसूक्ततन्त्रे ३८ पटले द्रष्टव्यम् ॥

स्नानतृणं, क्ली, (स्नानाय तृणम् ।) कुशः । इति शब्दमाला ॥

स्नानयात्रा, स्त्री, (स्नानस्य यात्रा उत्सवः ।) ज्यैष्ठपौर्णमास्यां श्रीविष्णोर्म्महास्नानरूपोत्सवः यथा, ब्रह्मपुराणम् ।
"मासि ज्यैष्ठे तु संप्राप्ते नक्षत्रे शक्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्द्विजाः ॥
तस्मिन् काले तु ये मर्त्त्याः पश्यन्ति पुरुषोत्तमम्
बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम् ॥"
स्कन्दपुराणविष्णुधर्म्मोत्तरयोः ।
"ज्यैष्ठामहस्नावतीर्णस्तत् पुण्यं जन्मवासरम् ।